श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री करुणाकराचार्यस्वामिना विरचितम्

# ॥ श्रीमुष्णम् श्रीमदाण्डवन् चरमश्लोकसप्तकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमुष्णम् श्रीमदाण्डवन् चरमश्लोकसप्तकम् ॥

श्रीवत्सवंशकलशोदधिकौस्तुभस्य
श्रीवासराघवगुरोस्तनयं ततश्च।
विद्या अवाप्य विबुधोत्तमतां दधानं
कुर्वे सदा हृदि गुरुं करुणाकराख्यम्॥

कल्यब्दे हेमलम्बे झषगृहवसतौ भास्करे शुक्लपक्षे
रेवत्यामिन्दुवारे सकलबुधनुतः कौलवे ब्राह्मयोगे।
द्वैतीयीके तिथौ श्रीयतिपतिसदृशो रङ्गरामानुजाख्यः
श्रुत्यन्तश्रीसुमित्रासुतमुनिसुदृशा प्राप रङ्गेन्द्रपादू॥ 1 ॥

हेमलम्बे झषे शुक्लद्वितीयायां विधौ मुनिः।
रङ्गरामानुजो भेजे स्वाचार्यचरणाम्बुजे॥ 2 ॥

कलानिधौ कल्पककल्पकेऽस्मिन्
गानार्हकण्ठेन गभीरधुर्ये।
धरां विहायाद्य गते पदं तत्
बुधा धरेयुः कथमत्र भूमौ॥ 3 ॥

अगस्त्यवद्द्राविडलक्षणे यः
दैवज्ञमार्गेऽप्यथ गर्ग एव।
व्यासः परः सर्वकलापटुत्वात्
मुनित्रयं चान्यदिमं श्रितं तत्॥ 4 ॥

मीने पञ्चमवासरे मुनिरयं सिद्धिं श्रितस्सद्गुणः
कूर्मोऽसौ निजचिन्तयैव सकलान् गोप्ता जनान् संश्रितान्।

वाराहक्षितिसञ्ज्ञया भुवि बुधैस्सानन्दमासेवितः
सिंहास्योदितगर्जनां च सुधियां गोष्ठ्यां दधानस्सुधीः ॥ 5 ॥

सत्पादत्रयविक्रमे कविवरे सक्तः कवीन् रक्षिता
रामेणाऽथ जितान्तरङ्गललितो रङ्गेशपादू भजन्।
रामः पुण्यजनेशसेवितपदः पादूप्रभावर्द्धिदः
श्रीमद्यामुनकर्षणो रसपरो व्याख्यानतस्तद्गिराम् ॥ 6 ॥

श्रीरामानुजतारलब्धसुजनिः रामानुजोऽयं नवः
कल्कीवास कलिं विधूय सततं धर्मस्य गुप्तिं दधत्।
इत्येवं दशधाऽवतारगणनां स्वस्मिन् दधानो नतान्
पायादेष मुनीश्वरः स्वदयया पश्यन् पदात् शाश्वतात् ॥ 7 ॥

रङ्गलक्ष्मणे तत्पदं श्रिते सप्तकेन तं भक्तितस्स्मरन्।
रङ्गलक्ष्मणप्रत्तयाऽऽख्यया शास्त्रसाहितीवल्लभोऽनमत् ॥ 8 ॥

॥ इति श्रीमुष्णम् श्रीमदाण्डवन् चरमश्लोकसप्तकं समाप्तम् ॥